International Journal of Sanskrit Research 2020; 6(4): 168-171

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(4): 168-171
© 2020 IJSR
www.anantaajournal.com
Received: 24-01-2020
Accepted: 15-03-2020

डॉ0 चुक्का प्रवीणः
रीडर्, संस्कृत विभागः आन्ध्रा क्रिस्टियन् कलाशाला गर्तपुरी, आन्ध्र प्रदेशः, भारत

Corresponding Author:
डॉ0 चुक्का प्रवीणः
रीडर्, संस्कृत विभागः आन्ध्रा क्रिस्टियन् कलाशाला गर्तपुरी, आन्ध्र प्रदेशः, भारत

# पञ्चतन्त्रस्य नित्योपयोगित्वम्

**डॉ0 चुक्का प्रवीणः**

**प्रस्तावनाः**

वाङ्मयेन बहूनि प्रयोजनानि आलङ्कारिकैः यद्यऽपि प्रतिपादितानि तथापि उपदेशैः अपि मुख्यप्रयोजनरूपेण ग्राह्याः । यथा मधुमिश्रितं तिक्तमप्यौषधं स्वादु हितकारि च भवति, तथैव रसानन्दमिश्रितः उपदेशः हितकारि भवति । यदाहुः ---

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुज्यते ।
प्रथमालीषुमधवः पिबन्ति कटुभेषजम् ।। [1]

समस्तवाङ्मयेऽपि कथासाहित्यम् उपशकरणे महत्प्रयोजकम् इति महर्षिभिः एव निरूपितम् । महाभारते शान्तिपर्वणि भीष्मः युधिष्ठिरं धर्ममुपदेष्टुं कथाः एव साधनरूपेण स्वीकृतवान् । अतः कथासाहित्यस्य आद्यं समग्रं च उदाहरणम् महाभारतमेव । किन्तु महाभारतस्थाः कथाः बालैः न ग्राह्याः । मनुष्यकथाभ्यः अपि जन्तकथाः विनोदजनकाः सुलभोपदेशिकाः चेति आशयेन विष्णुशर्मानामकः कश्चन पण्डितः ए.डी.600 काले पञ्चतन्त्रम् कथासाहित्यरूपं रचितवान् ।

तन्त्र शब्दश्च शान्त्रमित्यर्थे रूढम् । विभागः, प्रकारः, भेदः इत्यपि अर्थाः ग्राह्याः । मूर्खान् राजपुत्रान् नीतिकोविदान् कर्तुं पञ्चतन्त्रम् रचितमिति कथामुखेन ज्ञायते । पञ्चतन्त्रे मित्रभेदः, मित्रसम्प्राप्तिः, काकोलूकीयम्, लब्धप्रणाशः, अपरीक्षितकारकश्चेति पञ्च तन्त्रीणि विद्यन्ते । इतिहासपुराणेभ्यः प्रसिद्ध काव्येभ्यश्च कामन्दकादि नीतिशास्त्रेभ्यश्च श्लोकान् यथावसरं स्वीकृत्य कथासन्दर्भेण योजयित्वा विश्वजनीनं उपदेशं विष्णुशर्मा ग्रन्थमुखेन कृतवान् । अत्याधुनिकोऽपि अस्मिन् काले अभिवृद्धे विज्ञानशास्त्रे कदापि मानवेन अपरित्याज्यानि बहूनि मानवीयमूल्यानि पञ्चतन्त्रे उपदिष्टानि । तेषु नित्यजीवनस्य अत्यन्त उपयोगानि मानवीयमूल्यानि कानिचित् अत्र उदह्रियन्ते ।

1. सर्वेऽपि मनुष्यः संघे यशस्वी, विद्यावान्, सद्गुणसम्पन्नश्च भवेत् । यथा अन्ये मनुष्यश्चेत् एवं वर्तनीयमिति तमेव मार्गदर्शकत्वेन निर्दिशेयुः । तथा शीतलसम्पन्नो भवितुं सर्वैर्यतनीयम् । अन्यथा न केवलं स्वस्य वशस्यापि यशो हानिः भवत्येव ।

गुणिगणगणनारम्भ्यो न पतति कठिना ससंभ्रमा यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ।। [2]

सत्पुरुषाणां गणने कानिष्ठिकायां सर्वप्रथमः गण्यते । अतः गुणैर्वर्तनेन च सर्वप्रथमेन भाव्यम् । सुतिनी इति प्रत्ययः मत्वर्यीयः तदस्याः अस्तीति विग्रहः । प्रशस्तः सुतः अस्याः इति मत्वर्थीयेन विशेषोऽर्थः गम्यते । उत्पन्नः पुत्रः यदि प्रशस्तगुणवान् चेत् तदैव जन्मनः सार्धक्यं इति एष श्लोकः सर्वान् बोधयति ।

2. मनुष्यः कष्टेषु कथं वर्तितव्यः सति सन्देहे किं वा तेन कार्यं इति प्रश्नस्यापि समाधानं पञ्चतन्त्रे लभ्यते ।

न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
एतदेवात्र पाण्डित्यं यत्स्वल्पाद् भूरिरक्षणम् ।। [3]

कदाचित् वस्तुद्वयस्य रक्षणे कार्यद्वयस्य करणे वा यौगपत्येन कस्मिन् प्रवृत्तिः कार्या इति सन्देहो भवत्येव । यदि अस्मभ्यः परित्यक्तादपि द्वितीयं हितकरं तद्रक्षणेन अग्रं कार्यं धनं वा रक्षणीयम् । एवं स्वल्पस्य त्यागेन महद्वस्तु कार्यं या रक्षितुं भवेत्, तदा स्पल्पत्यागाय शोकः न कार्यः इति हितम् अत्र उपदिष्टम् ।

सुवर्ण पुष्पितां पृथ्वीं विचिन्वन्ति नरास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानन्ति सेवितुम् ।। [4]

इदानीमपि एते त्रयः प्रकाराः उपकारकाः । भूमेः सुवर्णं छिनोति इत्यनेन कार्यस्य योग्यं लभते इत्यर्थः । शूरः कार्यसाधकः न केवलं योद्धा, कृतविद्यः पण्डितः । सेवा प्रायशः पूज्यविषये कार्यसाधिका इति त्रिकाला बाधितोऽयं उपदेशः।

3. मित्रसम्प्राप्ति नामके द्वितीयतन्त्रेऽपि नित्यजीवनोपयोगिनः बहवो विषयाः उपदिष्टाः । बहूनि मित्राणी योग्यानि साधयित्वा साधनहीनोऽपि दुस्साध्यं साधयितुं शक्नोतीति उपदेशः तत्र दृष्टः ।

मित्रवान् साधयत्यर्थान् दुःस्साध्यानपि वै यतः ।
तस्मान्मित्राणि कुर्वीत समानान्येव चात्मनः ।। [5]

अत्रापि मित्रवान् इत्यत्र मत् प्रत्ययः प्रशंसार्थकः । योग्यमेव मित्रं प्राप्य कार्यान् साधयितुं शक्तो भवति । मित्रे अयोग्ये कार्यनाशः सिद्धः एव इति अत्र सूचितम् ।

ददाति प्रतिगृह्णाणि गुह्यामाख्याति पृच्छति ।
भुङ्क्ते योजयते चैव षड्विधं मित्रलक्षणम् ।। [6]

मित्रमपि कथं भवेत्, प्रियतस्य मित्रस्य प्रवृत्तिः कथं भवेत् इत्यपि मित्रसंप्राप्तौ उपदिष्टम् । यः केवलं स्वकार्यं साधयितुं आशां पूरयितुं वा मित्रं भवति प्रत्यक्षे एव प्रियं वहति, परोक्षे कार्यं हानिं कुरुते, तं सदा वर्जयेत् इत्यपि अत्र सूचितम् ।

4. प्रायशः अद्यतन जनाः अत्याशया आक्रान्ताः पर्याप्तं धनं तर्जयुतुमशक्ताः दुःखिताः भवन्ति । धनवन्तः दृष्ट्वा दुःखमपि अनुभवति । क्वचित् साधवोऽपि प्रभूतधनसंपादनाय दुर्मार्गमाश्रयन्ते । क्वचित् च सुलभमार्गेण अमार्गेण वा भूरि सम्पादयितुं, मितमपि हस्तगतं द्रव्यं व्ययीकृत्य तस्यापि नाशेन दुःखमनुभवन्ति । एवं मतिं कृत्वा सर्वथा निराशाऽपि न कार्या । निराशया यत्नः पिरत्यज्यते । यत्न परित्यागे जीवनं दुर्लभं भवति । अतितृष्णायुक्तः शिरसि ज्वालया पीडितः इव दुःखं प्राप्नोतीति मित्रसम्प्राप्तौ स्पष्टमुपदिष्टम् ।

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् ।
अतितृष्णाभिभूतस्य शिखा भवति मस्तके ।। [7]

5. कीदृक् वर्तनेन मनुष्यः सम्पदं प्राप्नोति इति मित्रसम्प्राप्तौ यदुक्तं तत् सार्वकालिकं सर्वैः आचरणीयम् च ।

उत्सहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरे कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं मार्गति वासहेतोः ।। [8]

उत्साहः कार्यनिर्वहणासक्तिः । दीर्घसूत्रता बुद्धिपूर्वकमलसत्वम् । इयं क्रिया एवं कर्तव्या इति ज्ञानं क्रियाविधिज्ञता । व्यसनेषु स्त्री,मद्यपानादि सप्तव्यसनेषु वैमुख्यम् । उपकारिषु प्रत्युपकारकरणेच्छा कृतज्ञता । एवं विधाःसद्गुणाः सर्वेणापि सर्वदा सेविताः लोकप्रीतिकरं कुर्वन्ति । लोकप्रीत्या संपदं लभते इति सर्वजनोपयोगी सत्यम् ।

6. कदाचित् स्थितकर्मणि वर्तमानं अस्थिरं दृष्टं प्रभूतयोजनं कर्म लोभयति । यद्ययं तादृशस्य अस्थिरस्य कृते स्थिरं पूर्ववत् सेवितुम् त्यजति ईषत् लाभ प्राप्तोरनन्तरं अधृवं नष्टं भवति । पुनः वृत्तिहीनः स्थिरं सेवितुम् आगतोऽपि तत् केनापि आक्रान्तं स्यात् । तदा उभयभ्रष्टो भविष्यति ।

योध्रुवण परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ।। [9]

7. आरोग्यविषयेऽपि उपकारकः महानुपदेशः काकोलूकीये दृश्यन्ते । केचन दीर्घसूत्राः शरीरे प्रथमं रेगलक्षणं ज्ञात्वाऽपि किमिदानीं इदं हानिकारकमिति धनलोभेन आलस्योपि काललोभेन वा उपेक्षं कुर्वते । यदा सः आमयः परिवृद्धः महत्या चिकित्सायाऽपि असाध्या भवति ।

जातमात्रं न यः शत्रुं व्याधिश्च प्रशमं नयेत् ।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते ।। [10]

यदि विचार्य करणीयं कार्यं किञ्चित् वर्तते तदधिकृत्य बहुभिः मन्त्रं कृत्वा साध्याऽसाध्य निर्णयं कृत्वा निर्णयः कार्यः । तथाकृतं कार्यं कालान्त्रेऽपि विपरीतफलं न भवति ।

बहुधा बुहुभिः सार्द्धं चिन्तिताः सुनिरूपिताः ।
कथंचिन्न विलीयन्ते विद्वद्भिश्चिन्चिता नयाः ।। [11]

8. आपदि प्राप्तायामपि यः धैर्ययुक्तः बुद्ध्या आपत् परिहारं चिन्तति सः आपदः मुक्तो भवत्येव । अतः आपत्सु अपि विषण्णो न भवेत् । शोकवर्जितः आपत् प्रतीकालं एव चिन्तयेदिति लब्धप्रणाशे सूचितम् ।

सपुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते ।
स एव दुर्गं तरति जलस्थो वानरो यथा ।। [12]

9. केचित् ज्ञानाभासेन पण्डितं मन्याः यथेच्छं कर्मसु प्रवर्तन्ते । अहमत्र विषये पण्डितः इति सप्रगल्भं वदन्ति च । अतथाविधं दृष्ट्वा परिहसन्ति च । एवं विधेन कर्माचरणेन महदनर्थं प्रप्नुवन्तीति अपरीक्षितकारकं निरूपितम् ।

कुदृष्टं कुपरिज्ञातं कुश्रुतं कुपरीक्षितम् ।
तन्नरेण न कर्तव्यं नापितेनात्र वत् कृतम् ।। [13]

एवं हितवचन निधानभूते पञ्चतन्त्रे सर्वजनोपयोगिनः, सर्वकार्योपयोगिनः, सर्वकालोपयोगिनः हितोपदेशकाः श्लोकाः शतकः वर्तन्ते । किन्तु युक्ततरा बुद्धिरेव आपदां तारिका इत्येव हितोपदेश सारः सर्वत्र ग्रन्थे दृश्यते । देवाः अपि यस्मिन् प्रसीदन्ति तस्मै तत्कालोपयोगिनीं बुद्धिं दास्यन्तीति सुभाषितमपि प्रसिद्धमेव ।

न दैवाः दण्डमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्धया संयोजितं तम् ।। [14]

**संदर्भः सूची:**


1. संस्कृत साहित्यचरित्र-मुदिगोण्ड गोपाल रेड्डि-पृ.सं – 727.
2. पञ्चगन्त्रम् -- कथामुखम् -- विष्णुशर्मः - श्लोकः –6.
3. पञ्चतन्त्रम् -- मित्रभेदः – विष्णुशर्मः --श्लोकः – 19.
4. पञ्चतन्त्रम् -- मित्रभेदः -- विष्णुशर्मः -- श्लोकः – 46.
5. पञ्चतन्त्रः --- मित्रसम्प्राप्तिः -- विष्णुशर्मः -- श्लोकः – 27.
6. पञ्चतन्त्रः -- मित्रसम्प्राप्तिः - विष्णुशर्मः -- श्लोकः --- 28.

7. पञ्चतन्त्रः --- मित्रसंप्राप्तिः -- विष्णुशर्मः -- श्लोकः – 80.
8. पञ्चतन्त्रः -- मित्रसंप्राप्तिः --- विष्णुशर्मः --- श्लोकः –126.
9. पञ्चतन्त्रः --- मित्रसंप्राप्तिः ---- विष्णुश्रर्मः -- श्लोकः –127.
10. पञ्चतन्त्रम् -- काकोलूकीयम् --- विष्णुशर्मः --- श्लोकः – 03.
11. पञ्चतन्त्रम् -- लब्धप्रणाशः --- विष्णुशर्मः -- श्लोकः – 01.
12. पञ्चतन्त्रम् -- अपरीक्षितकारकम् -- विष्णुशर्मः --श्लोकः –01.
13. नैषधीयम् -- मल्लिनाधव्याख्या -- सर्गः -- 08- श्लोकः--14.